केषु विशेषाच्छोषिणे हिताः मद्गुमूषिकदृच्छशायिकावकुशपूतिघासवानरप्रभृतयः पर्णमृगाः । मधुरा गुरवो वृष्याश्चक्षुष्याः शोषिणे हिताः । सृष्टमूत्रपुरीषाश्च कासार्शःश्वासनाशनाः । श्वाविच्छल्यकगोधाशशवृषदंशलोपाकलोमशकर्णकदलीमृगप्रियकाऽजगरसर्पमूषिकनकुलमहाबभ्रुप्रभृतयो विलेशयाः । वर्च्चोमूत्रं संहतं कुर्य्युरेते वीर्य्ये चोष्णाः पूर्ब्बवत् स्वादुपाकाः । वातं हन्युः श्लेष्मपित्ते च कुर्य्युः स्निग्धाः कासश्वासकार्श्यापहाश्च । कषायमधुरस्तेषां शशः पित्तकफापहः । नातिशीतलवीर्य्यत्वाद्वाते साधारणो मतः । गोधा विपाके मधुरा कषायकटुका स्मृता । वातपित्तप्रशमनी वृंहणी बलवर्द्धिनी । शल्यकः स्वादुपित्तघ्नो लघुः शीतो विषापहः । प्रियको मारुते पथ्योऽजगरस्त्वर्शसां हितः । दुर्नामानिलदोषघ्नाः क्रमिदूषीविषापहाः । चक्षुष्या मधुराः पाके सर्पा मेधाग्निवर्द्धनाः । दर्व्वीकरा दीपकाश्च तेषूष्णाः कटुपाकिनः । मधुराश्चातिचक्षुष्याः सृष्टविण्मूत्रमारुताः । अश्वाश्वतरगोखरोष्ट्रवस्तोरभ्रमेदःपुच्छकप्रभृतयो ग्राम्याः । ग्राम्या वातहराः सर्व्वे वृंहणाः कफपित्तलाः । मधुरा रसपाकाभ्यां दीपना बलवर्द्धनाः । नातिशीतो गुरुः स्निग्धो मन्दपित्तकफः स्मृतः । छगलस्त्वनभिष्यन्दी तेषां पीनसनाशनः । वृंहणं मांसमौरभ्रं पित्तश्लेष्मावहं गुरु । मेदःपुच्छोद्भवं वृष्यमौरभ्रसदृशं गुणैः । श्वासकासप्रतिश्यायविषमज्वरनाशनम् । श्रमात्यग्निहितं गव्यं पवित्रमनिलापहम् । औरभ्रवत्सलवणं मांसमेकशफोद्भवम् । अल्पाभिष्यन्द्ययं वर्गो जाङ्गलः समुदाहृतः । दूरे जनान्तनिलया दूरे पानीयगोचराः । ये मृगाश्च विहङ्गाश्च ते ऽल्पाभिष्यन्दिनो मताः । अतोवासन्ननिलयाः समीपोदकगोचराः । ये मृगाश्च विहङ्गाश्च महाभिष्यन्दिनस्तु ते । आनूपवर्गस्तु पञ्चविधः तद्यथा कूलचराः प्लवाः कोशस्थाः पादिनो मत्स्याश्चेति । तत्र गजगवयमहिषरुरुचमरसृमररोहितवराहखड्गिगोकर्णकालपुच्छकोन्द्रन्यङ्कुरङ्कगवयप्रभृतयः कूलचराः पशवः । वातपित्तहरा वृष्यामधरा रसपाकयोः । शीतला बलिनः स्निग्धा मूत्रलाः कफवर्द्धनाः । विरूक्षणो लेखनश्च वीर्य्योष्णः पित्तदूषणः । स्वादम्ललवणस्तेषां गजः श्लेष्मानिलापहः । गवयस्य तु मांसं हि स्निग्धं मधुरकासजित् । विपाके मधुरं चापि व्यवायस्य तु वर्द्धनम् । स्निग्धोष्णमधुरो वृष्यो महिषस्तर्पणो गुरुः । निद्रापुंस्त्वबलस्तन्यवर्द्धनो मांसदार्ढ्यकृत् । रुरुमांसं समधुरं कषायानुरसं स्मृतम् । वातपित्तोपशमनं गुरु शुक्रप्रवर्द्धनम् । तथा चमरमांसन्तु स्निग्धं मधुरकासजित् । विपाके मधुरं चापि वातपित्तप्रणाशनम् । सृमरस्य तु मांसञ्च कषायानुरसं स्मृतम् । वातपित्तोपशमनं गुरु शुक्रविवर्द्धनम् । स्वेदनं वृंहणं वृष्यं शीतलं तर्पणं गुरु । स्निग्धं श्रमानिलहरं वाराहं बलवर्द्धनम् । कफघ्नं खड्गिपिशितं कषायमनिलापहम् । पित्र्यं पवित्रमायुष्यं बद्धमूत्रं विरूक्षणम् । गोकर्णमांसं मधुरं स्निग्धं मृदु कफावहम् । विपाके मधुरञ्चापि रक्तपित्तविनाशनम् । हंससारसक्रौञ्चचक्रवाककुररकादम्बकारण्डवजीवञ्जीवकवकबलाकापुण्डरीकप्लवशरारीमुखनन्दीमुखमद्गूत्क्रोशकाचाक्षमल्लिकाक्षशुक्लाक्षपुष्करशायिकाकोनालकाम्बुकुक्कुटिकामेघरावश्वेतचरणप्रभृतयः प्लवाः संघातचारिणः । रक्तपित्तहराः शीताः स्निग्धा वृष्या मरुज्जितः । सृष्टमूत्रपुरीषाश्च मधुरा रसपाकयोः । गुरूष्णमधुरः स्निग्धः स्वरवर्णबलप्रदः । वृंहणः शुक्रलस्तेषां हंसो मारुतनाशनः । शङ्खशङ्खनखशुक्तिशम्बूकभल्लूकप्रभृतयः कोशस्थाः । कूर्म्मकुम्भीरकर्कटकक्रष्णकर्कटकशिशुमारप्रभृतयः पादिनः । शङ्खकूर्म्मादयः स्वादुरसपाका मरुन्नुदः । शीताः स्निग्धा हिताः पित्ते वर्च्चस्याः श्लेष्मवर्द्धनाः । क्रष्णकर्कटकस्तेषां बल्यः कोष्णोऽनिलापहः । शुक्लः सन्धानकृत् सृष्टविण्मूत्रोऽनिलपित्तहा । मत्स्यास्तु द्विविधा नादेयाः सामुद्राश्च । तत्र नादेयाः । रोहितपाठीनपाटलाराजीववर्म्मिगोमत्स्यक्रष्णमत्स्यवागुञ्जारमुरलसहस्रदंष्ट्रप्रभृतयो नादेयाः । नादेया मधुरा मत्स्या गुरवोमारुतापहाः । रक्तपित्तकराश्चोष्णा वृष्याः स्निग्धाल्पवर्च्चसः । कषायानुरस्तेषां शष्पशैवालभोजनः । रोहितो मारुतहरो नात्यर्थं पित्तकोपनः । पाठीनः श्लेष्मलो वृष्यो निद्रालुः पिशिताशनः । दूषयेद्रक्तपित्तन्तु कुष्ठरोगं करोत्यसौ । मुरलो वृंहणो वृष्यः स्तन्यश्लेष्मकरस्तथा । सरस्तडागसम्भूताः स्निग्धाः स्वादुरसाः स्मृताः । महाह्रदेषु बलिनः स्वल्पेऽम्भस्यबलाः स्मृताः । तिमितिमिङ्गिलकुलिशपाकमत्स्यनिरालकमन्दिवारलकमकरगर्गरकचन्द्रकमहामीनराजीवप्रभृतयः सामुद्राः । सामुद्रा गुरवः स्निग्धा मधुरा नातिपित्तलाः । उष्णा वातहरा वृष्या वर्च्चस्याः श्लेष्मवर्द्धनाः । बलावहा विशेषेण मांसाशित्वात्समुद्रजाः । तेषामप्य-